# ॥ સ્કન્દલહરી ॥

.. skandalaharI ..

sanskritdocuments.org

January 3, 2017

# .. skandalaharI ..

# ॥ સ્કન્દલહરી ॥

## Sanskrit Document Information

Text title : skandalaharI

File name : skandalaharI.itx

Location : doc_subrahmanya

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com, PSA Easwaran

Description-comments : Subrahmanya Stuti Manjari, Mahaperiaval Trust

Acknowledge-Permission: Mahaperiaval Trust

Latest update : January 3, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

January 3, 2017

*sanskritdocuments.org*

# ॥ સ્કન્દલહરી ॥

ૐ શ્રીગણેશાય નમઃ ।

શ્રીઃ ।

શ્રિયૈ ભૂયાઃ શ્રીમચ્છરવણભવ ત્વં શિવસુતઃ
પ્રિયપ્રાપ્ત્યૈ ભૂયાઃ પ્રતનગજવક્ત્રસ્ય સહજ ।
ત્વયિ પ્રેમોદ્રેકાત્પ્રકટવચસા સ્તોતુમનસા
મયાઽઽરબ્ધં સ્તોતું તદિદમનુમન્યસ્વ ભગવન્ ॥ ૧॥

નિરાબાધં રાજચ્છરદુદિતરાકાહિમકર-
પ્રરૂઢજ્યોત્સ્નાભાસ્મિતવદનષટ્કસ્ત્રિણયનઃ ।
પુરઃ પ્રાદુર્ભૂય સ્ફુરતુ કરુણાપૂર્ણહૃદયઃ
કરોતુ સ્વાસ્થ્યં વૈ કમલદલબિન્દૂપમહૃદિ ॥ ૨॥

ન લોકેઽન્યં દેવં નતજનકૃતપ્રત્યયવિધિં  var  નતજનપરિત્રાણ નિપુણં
વિલોકે ભીતાનાં નિખિલભયભીતૈકશરણમ્ ।  var  વિધ્વંસનચણમ્ ।
કલૌ કાલેઽપ્યન્તર્હરસિ તિમિરં ભાસ્કર ઇવ
પ્રલુબ્ધાનાં ભોગેષ્વપિ નિખિલભોગાન્વિતરસિ ॥ ૩॥

શિવ સ્વામિન્ દેવ શ્રિતકલુષનિઃશેષણ ગુરો  var  શેષણ વિભો
ભવધ્વાન્તધ્વંસે મિહિરશતકોટિપ્રતિભટ ।
શિવપ્રાપ્ત્યૈ સમ્યક્ફલિતસદુપાયપ્રકટન
ધ્રુવં ત્વત્કારુણ્યે કલિરપિ કૃતી ભૂપવિભવઃ ॥ ૪॥

અશક્તાનાં કર્મસ્વપિ નિખિલનિઃશ્રેયસકૃતૌ
પશુત્વગ્રસ્તાનાં પતિરસિ વિપાશત્વકલને ।
પ્રશસ્તાનાં ભૂમ્નાં નિધિરસિ નિરોદ્ધા નિજશુચાં
અશક્તાનાં કર્તા જગતિ ધૃતશક્તિઃ કિલ ભવાન્ ॥ ૫॥

var  જગત્કર્તા ભર્તા ભવસિ વિનિહર્તાઽન્તસમયે
રુષાઽઽર્તાનાં હર્તા વિષયિવિષયાણાં ઘટયિતા
તૃષાઽઽર્તાનાં કાલે પરમમૃતવર્ષી ઘન ઇવ ।
મૃષાજ્ઞાનાર્તાનાં નિખિલવિચિકિત્સાપરિહરો
વિષગ્રસ્તાનાં ત્વં સકલભયહર્તા વિલસસિ ॥ ૬॥

રસાધિક્યં ભક્તૈરધિકમધિકં વર્ષય વિભો
પ્રસીદ ત્વં ભૂયઃ પ્રકટય ચિદાનન્દલહરીમ્ ।
અસારે સંસારે સદસતિ ન લિપ્તં મમ મનઃ  var  સદસતિ ન સઙ્ગો ભવતુ મે
કુસીદં ભૂયાન્મે કુશલવતિ નિઃશ્રેયસપથે ॥ ૭॥

મહામોહારણ્યે વિચરતિ મનસ્તન્નિયમયન્
અહન્તાં નિશ્શેષીકુરુ કરુણયા ત્વં સ્નપય મામ્ ।
મહીયો માહાત્મ્યં તવ મનનમાર્ગે સ્ફુરતુ મે
મહસ્સ્તોમાકારે ત્વયિ મતિજુષિ સ્યાત્ક્વ નુ તમઃ ॥ ૮॥

વલક્ષાભં સ્નિગ્ધં વદનકમલેભ્યઃ પ્રસૃમરં
મિલત્કારુણ્યાર્દ્રં મૃદિતભુવનાર્તિ સ્મિતપદમ્ ।
પુલિન્દાપત્યસ્ય પ્રકટપુલકોદ્રેકજનકં
દલદ્દૈન્યં ખેદં હરતુ સતતં નઃ સુરગુરો ॥ ૯॥  var  નઃ શરજને
અતીતો બ્રહ્માદીન્ કૃતિમુખકૃતઃ કારણપતીન્
ક્ષિતિસ્તોયં વહ્નિર્મરુદસિ વિયત્તત્ત્વમખિલમ્ ।
પતિઃ કૃત્યાનાં ત્વં પરિણતચિદાત્મેક્ષણવતાં
ધૃતિસ્ત્વં ધ્યાતઃ સન્ દિશસિ નિજસાયુજ્યપદવીમ્ ॥ ૧૦॥

ત્વદાત્મા ત્વચ્ચિત્તસ્ત્વદનુભવબુદ્ધિસ્મૃતિપથઃ
ત્વયા વ્યાપ્તં સર્વં જગદિદમશેષં સ્થિરચરમ્ ।  var  ત્વયા વ્યાપ્ત્વદલોકઃ
સદા યોગી સાક્ષાદ્ભજતિ તવ સારૂપ્યમમલં
ત્વદાયત્તાનાં કિં ન હિ સુલભમષ્ટૌ ચ વિભવાઃ૨॥ ૧૧॥  var  ભવતિ દુરવાપં ત્રિજગતિ ॥

કતિ બ્રહ્મણો વા કતિ કમલનેત્રાઃ કતિ હરાઃ
કતિ બ્રહ્માણ્ડાનાં કતિ ચ શતકોટિષ્વધિકૃતાઃ ।
કૃતાજ્ઞાઃ સન્તસ્તે વિવિધકૃતિરક્ષાભૃતિકરાઃ
અતઃ સર્વૈશ્વર્યં તવ યદપરિચ્છેદ્યવિભવમ્ ॥ ૧૨॥

નમસ્તે સ્કન્દાય ત્રિદશપરિપાલાય મહતે
નમઃ ક્રૌઞ્ચાભિખ્યાસુરદલનદક્ષાય ભવતે ।
નમઃ શૂરક્રૂરત્રિદશરિપુદણ્ડાધ્વરકૃતે  var  નમઃ પ્રષ્ઠ ક્રૂર
નમો ભૂયો ભૂયો નતિકૃદવને જાગરવતે ॥ ૧૩॥

શિવસ્ત્વં શક્તિસ્ત્વં તદુભયતમૈક્યં પૃથગસિ

var  શિવસ્ત્વં શક્તિસ્ત્વં પ્રથયસિ તદૈક્યં ગુહ વિભો
સ્તવે ધ્યાને પૂજાજપનિયમમુખ્યેષ્વભિરતાઃ ।
ભુવિ સ્થિત્વા ભોગાન્ સુચિરમુપભુજ્ય પ્રમુદિતાઃ
ભવન્તિ સ્થાને તત્ તદનુ પુનરાવૃત્તિવિમુખાઃ ॥ ૧૪॥  var  ભવન્તિ ત્વત્સ્થાને

ગુરોર્વિદ્યાં લબ્ધ્વા સકલભયહન્ત્રીં જપપરાઃ
પુરશ્ચર્યામુખ્યક્રમવિધિજુષો ધ્યાનનિપુણાઃ ।
વ્રતસ્થૈઃ કામૌઘૈરભિલષિતવાઞ્છાં પ્રિયભુજઃ
ચિરં જીવન્મુક્તા જગતિ વિજયન્તે સુકૃતિનઃ ॥ ૧૫॥

શરજ્જ્યોત્સ્નાશુભ્રં સ્ફટિકનિકુરુમ્બાભરુચિરં  var  સ્ફટિકનિકુરુમ્બાન્તિવિમલં
સ્ફુરન્મુક્તાહારં ધવલવસનં ભાવયતિ યઃ ।
પ્રરોહત્કારુણ્યામૃતબહુલધારાભિરભિતઃ
ચિરં સિક્તાત્મા વૈ સ ભવતિ ચ વિચ્છિન્નનિગડઃ ॥ ૧૬॥

વૃધા કર્તું દુષ્ટાન્ વિવિધવિષવેગાન્ શમયિતું
સુધારોચિષ્કોટિ પ્રતિભટરુચિં ભાવયતિ યઃ ।
અધઃ કર્તું સાક્ષાદ્ભવતિ વિનતાસૂનુમચિરાત્  var  કર્તું ભક્તો ભવતિ
વિધત્તે સર્પાણાં વિવિધવિષદર્પાપહરણમ્ ॥ ૧૭॥

પ્રવાલાભાપૂરે પ્રસરતિ મહસ્તે જગદિદં
દિવં ભૂમિં કાષ્ઠાઃ સકલમપિ સઞ્ચિન્તયતિ યઃ ।
દ્રવીકુર્યાચ્ચેતસ્ત્રિદશનિવહાનામપિ સુખાદ્-
ભુવિ સ્ત્રીણાં પુંસાં વશયતિ તિરશ્ચામપિ મનઃ ॥ ૧૮॥

નવામ્ભોદશ્યામં મરકતમણિપ્રખ્યમથ વા
ભવન્તં ધ્યાયેદ્યો ભવતિ નિપુણો મોહનવિધૌ ।
દિવિષ્ઠાનાં ભૂમાવપિ વિવિધદેશેષુ વસતાં
નૃણાં દેવાનાં વા વિયતિ ચરતાં પત્રિફણિનામ્ ॥ ૧૯॥

var  ધ્રુવં પક્ષીણાં વા ભુજગવનિતાનાં સપદિ સઃ ॥ ૧૯
કુમાર શ્રીમંસ્ત્વાં કનકસદૃશાભં સ્મરતિ યઃ
સમારબ્ધસ્તમ્ભે સકલજગતાં વા પ્રભવતિ ।
સમસ્તદ્યુઃસ્થાનાં પ્રબલપૃતનાનાં સવયસાં
પ્રમત્તવ્યાઘ્રાણાં કિટિહયગજાનાં ચ સપદિ ॥ ૨૦॥

ઘટાત્કારૈઃ સાકં સહકૃતમહાધૂમપટલ- var છટાત્કારૈઃ સાકં
સ્ફુટાકારં સાક્ષાત્સ્મરતિ યદિ મન્ત્રી સકૃદપિ ।
હઠાદુચ્ચાટાય પ્રભવતિ મૃગાણાં સ પતતાં
પટુર્વિદ્વેષે સ્યાદ્વિધિરચિતપાશં વિઘટયન્ ॥ ૨૧॥

સ્મરન્ઘોરાકારં તિમિરનિકુરુમ્બસ્ય સદૃશં
જપન્મન્ત્રાન્ મર્ત્યઃ સકલરિપુદર્પક્ષપયિતા ।
સ રુદ્રેણૌપમ્યં ભજતિ પરમાત્મન્ ગુહ વિભો
વરિષ્ઠઃ સાધૂનામપિ ચ નિતરાં ત્વદ્ભજનવાન્ ॥ ૨૨॥

મહાભૂતવ્યાપ્તં કલયતિ ચ યો ધ્યાનનિપુણઃ
સ ભૂતૈઃ સન્ત્યક્તસ્ત્રિજગતિ ચ યોગેન સરસઃ ।
ગુહ સ્વામિન્નન્તર્દહરયતિ યસ્ત્વાં તુ કલયન્
જહન્માયો જીવન્ભવતિ સ વિમુક્તઃ પટુમતિઃ ॥ ૨૩॥

શિવસ્વામિન્ ગૌરીપ્રિયસુત મયૂરાસન ગુહે-
ત્યમૂન્યુક્ત્વા નામાન્યખિલદુરિતૌઘાન્ ક્ષપયતિ ।
ઇહાસૌ લોકે તુ પ્રબલવિભવસ્સન્ સુવિચરન્
વિમાનારૂઢોઽન્તે તવ ભજતિ લોકં નિરુપમમ્ ॥ ૨૪॥

તવ શ્રીમન્મૂર્તિં કલયિતુમનીશોઽહમધુના
ભવત્પાદામ્ભોજં ભવભયહરં નૌમિ શરણમ્ ।
અતઃ સત્યાદ્રીશ પ્રમથગણનાથાત્મજ વિભો
ગુહ સ્વામિન્ દીને વિતનુ મયિ કારુણ્યમનિશમ્ ॥ ૨૫॥

ભવાયાનન્દાબ્ધે શ્રુતિનિકરમૂલાર્થમખિલં
નિગૃહ્ય વ્યાહર્તું કમલજમસક્તં તુ સહસા ।
બ્રુવાણસ્ત્વં સ્વામિક્ષિતિધરપતે દેશિકગુરો var સ્વામિક્ષિતિધરપતે સ્વામિમલૈ
ગુહ સ્વામિન્દીને મયિ વિતનુ કારુણ્યમનિશમ્ ॥ ૨૬॥

અગસ્ત્યપ્રષ્ઠાનામમલહૃદયાબ્જૈકનિલયં
સકૃદ્વા ન ધ્યાતં પદકમલયુગ્મં તવ મયા ।
તથાપિ શ્રીજન્તિ સ્થલનિલય દેવેશ વરદ var શ્રીજન્તિ તિરુછેન્દૂર્ ??
ગુહ સ્વામિન્દીને મયિ વિતનુ કારુણ્યમનિશમ્ ॥ ૨૭॥

રણે હત્વા શક્ત્યા સકલદનુજાંસ્તારકમુખાન્

હરિબ્રહ્મેન્દ્રાણામપિ સુરમુનીનાં ભુવિ નૃણામ્ ।
મુદં કુર્વાણઃ શ્રીશિવશિખરિનાથ ત્વમખિલાંઆ var શિવશિખરિનાથ શિવગિરિ
ગુહ સ્વામિન્ દીને મયિ વિતનુ કારુણ્યમનિશમ્ ॥ ૨૮॥

શરદ્રાકાજૈવાતૃક વિમલષડ્વક્ત્રવિલસદ્-
દ્વિષડ્બાહો શક્ત્યા વિદલિતમહાક્રૌઞ્ચશિખરિન્ ।
હૃદાવાસ શ્રીહલ્લકગિરિપતે સર્વવિદુષાં
ગુહ સ્વામિન્દીને મયિ વિતનુ કારુણ્યમનિશમ્ ॥ ૨૯॥

મહાન્તં કેકીન્દ્રં વરદ સહસાઽઽરુહ્ય દિવિષદ્-
ગણાનાં સર્વેષામભયદ મુનીનાં ચ ભજતામ્ ।
બલારાતેઃ કન્યારમણ બહુપુણ્યાચલપતે
ગુહ સ્વામિન્દીને મયિ વિતનુ કારુણ્યમનિશમ્ ॥ ૩૦॥

મહદ્બ્રહ્માનન્દં પરશિવગુરું સન્તતલસત્-
તટિત્કોટિપ્રખ્યં સકલદુરિતાર્તિઘ્નમમલમ્ ।
હરિબ્રહ્મેન્દ્રામરગણનમસ્કાર્યચરણં
ગુહં શ્રીસઙ્ગીતપ્રિયમહમન્તર્હૃદિ ભજે ॥ ૩૧॥

નમઃસ્કન્દદેવાય ।

ઇતિ શ્રીસ્કન્દલહરી સમાપ્તા ।

Proofread by Sivakumar Thyagarajan shivakumar24 at gmail.com, PSA Easwaran

.. skandalaharI ..
was typeset using XƎLATEX 0.99996
on January 3, 2017

Please send corrections to *sanskrit@cheerful.com*